# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -शास्त्रीद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – ५ | गुणाः - ७० |
|---|---|---|
| विषयः - फलितज्यौतिषम् | (C.C.- 2.3.5. Old ) | |
| दिनाङ्कः - ०८/१२/२०१८ | भारतीयकुण्डलीविज्ञानम् । | समयः -०२.०० तः ०५.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत । (१०)**

(१) खषड्घ्नं भयातं भभोगोद्धृतं तत्खतर्कघ्नधिष्ण्येषु युक्तं द्विनिघ्नम् ।
नवाप्तं शशी भागपूर्वस्तुभुक्तिः खखाभ्राष्टवेदा भभोगेन भक्ताः ॥

(२) गतर्क्षनाडीखरसेषुशुद्धा सूर्योदयादिष्टघटीषुयुक्ता ।
भयातसंज्ञा भवतीह तस्य निजर्क्षनाड्यासहितो भभोगः ॥

(३) गतैष्यदिवसाद्येन गतिर्निघ्नीखषड्हृता ।
लब्धमंशादिनां शोध्यं योज्यं स्पष्टो भेवद्ग्रहः ॥

**प्रश्नः २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत । (१०)**

(१) मेषादिराशिनाम् वर्णादिसहितं घातचक्रं वर्णयन्तु ।

(२) भयातभभोगसाधनम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत । (१०)**

(१) मेषादिगे सायनभागसूर्ये दिनार्धभा या पलभा भवेत् सा ।
त्रिष्ठा हतास्युर्दशभिर्भुजंगैर्दिग्भिश्चराधानि गुणोद्धृताऽन्त्या ॥

(२) लंकोदया विघटिका गजभानि गोङ्कदसास्त्रिपक्षदहना क्रमगोत्क्रमस्थाः ।
हीनान्विताश्चरदलैः क्रमगोत्क्रमस्थैः मेषादितो घटत उत्क्रमतस्त्विमे स्युः ॥

(३) कुजयमजीवज्ञसिताः पंचेन्द्रियवसुमुनीन्द्रियांशानाम् ।
अयुजि युजि तु भे विपर्ययस्थाः ॥

**प्रश्नः ४ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत । (१०)**

(१) षड्वर्गविचारः (२) लग्नानयनम् ।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत । (१०)**

(१) नीचोनखेटो रसतोऽधिकश्चेत् चक्राद्विशोध्योऽस्य च भे सरूपे ।
लवादिका ये द्विगुणा भवेयुरूच्चाभिधाना ग्रहरश्मयस्ते ॥

(२) अजवृषमृगाङ्गनाकर्किमीनवणिजांशकेष्विनाद्युच्चाः ।
दशशिख्यष्टाविंशतितिथीन्द्रियत्रिनवविंशेषु ॥

(३) दशा दशा हता कार्या दशभिर्भागमाहरेत् ।
यल्लब्धं सो भवेन्मासस्त्रिंशन्निघ्नं दिनं भवेत् ॥

**प्रश्नः ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत । ( १० )**

(१) नैसर्गिकमित्रामित्रविचारः ।

(२) सर्वरेखैक्यचक्रम् ।

**चतुर्थान्वितिः**

**प्रश्नः ७ अधोनिर्दिष्टेषु प्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु । ( १० )**

(१) कति राशयः सन्ति ?

(२) कति संवत्सराणि सन्ति ?

(३) नक्षत्रचक्रे षष्ठतमं नक्षत्रं किम् ?

(४) एकः राशिः अर्थात् कति अंशाः ?

(५) द्यून अर्थात् कः भावः ?

(६) गोङ्कः कः ?

(७) ख अर्थात् किम् ?

(८) गतर्क्ष अर्थात् किम् ?

(९) षड्वर्गे प्रथमवर्गः कः ?

(१०) कानि कानि पणफरस्थानानि ?

(११) स्वतुङ्गे अर्थात् किम् ?

(१२) शनेः नीचराशिः कः ?

(१३) गुर्जरे का दशा ग्राह्या ?

(१४) विंशोत्तरीदशायां कति वर्षाणि भवन्ति ?

(१५) कृष्णपक्षे का दशा ग्राह्या ?

--००--